Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 6 | ISSN : 2581- 6306

# वर्तमानकाले वैदिकयज्ञयागादीनाम् आवश्यकता महत्त्वञ्च

डॉ. बि. वेङ्कट लक्ष्मीनारायणः,
सहायकाचार्यः, शिक्षाशास्त्रविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः, अगरतला

**Article Info**
Volume 4, Issue 6
Page Number : 62-65

**Publication Issue :**
November-December-2021

**Article History**
Received : 15 Nov 2021
Published : 30 Dec 2021

सारः –
वैदिककालादारभ्य भारतीयसंस्कृतौ यज्ञ-यागादीनाम् अनुष्ठानं शुभकार्यस्य संसूचकत्वेन भवति। यज्ञस्य महत् तात्पर्यं भवति त्यागः। स्वस्य प्रियपदार्थादिकम् अग्नेः तथा वायोः माध्यमेन सकलसंसारस्य कल्याणाय यज्ञद्वारा वितीर्यते। वायोः शोधनेन सर्वेषाम् अरोग्यवर्धनस्य अवसरः प्राप्यते। हूताः वायवः प्राणिमात्रस्य स्वास्थ्यवर्धनं कुर्वन्ति, रोगनिवारणे सहायकाः भवन्ति। अतः वर्तमानकाले यज्ञयागादीनाम् आवश्यकता अत्यन्तमपेक्ष्यते।
मुख्यशब्दाः – यज्ञ-यागानां महत्त्वम्, यज्ञेषु उपयुज्यमानानि वस्तूनि, वर्तमाने यज्ञ-यागादीनां महत्त्वम्

भारतीयसंस्कृतेः प्राणभूताः वेदाः। भारतीयो धर्मः भारतीयं दर्शनम्, अध्यात्मम्, आचारः, व्यवहारः, रीतयः, नीतयः, विज्ञानं, कला चेति सर्वेऽपि विषयाः वेदाश्रिताः एवेति विदितपूर्वं समेषाम् । मनुना उक्तं यत् **वेदोऽखिलो धर्ममूलम्**, धर्मस्य मूलतत्त्वानां ज्ञानाय मात्रैकसाधनमस्ति वेदः। मानवानां कर्तव्यान्यपि मनुना मनुस्मृतौ स्पष्टतया उल्लिखतं यथा -

**यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।**[1]

महर्षिपतञ्जिलिना **ब्राह्मणेन निष्कारणो षडङ्गो वेदोऽध्येयो ज्ञेयश्च** इति महाभाष्ये वेदाध्ययनस्य महत्त्वं प्रतिपादितम्। यज्ञानां सम्पादनविधानम्, नैकेषां देवानां पूजनम्, निष्कामभावनया क्रियानां सम्पादनम्, ईश्वरस्य सर्वव्यापकता, ज्ञानकर्ममार्गयोः समन्वयः, भौतिकविचारेष्वनास्था, जन्मजन्मान्तरेषु विश्वासः, जीवनलक्ष्यं मोक्षस्य प्राप्तिः इत्यादीनां यथार्थज्ञानं वेदादेव प्राप्यते। समस्तमानवानां कर्तव्यबोधाय प्रामाणिकाः ग्रन्थाः भवन्ति वेदाः। परोपकारादिविषये, सत्क्रियादिविषये, सदाचरणविषये,

[1] मनुस्मृतिः - २.७

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

कर्तव्याकर्तव्यविषये, अतिथिसत्कारादिविषये च विस्तृतं ज्ञानं वेदेषु अन्तर्निहिताः सन्ति। प्राचीनभारतीयसम्भता-संस्कृतीनां विशदं चित्रणं वेदेषु द्रष्टुं शक्नुमः।

जीवनस्य साहित्यस्य च न कोऽपि प्रसङ्गः एवं वर्तते यस्य बीजं वैदिकवाङ्मये नोपलभ्येत। वेदस्योपदेशः सार्वलौकिकः सार्वभौमश्च वर्तते। सर्वं भेदभावं परित्यज्य मनुष्यो यथा मनुष्यो भवेत् तदर्थं वेदो "मनुर्भव मनुर्भव" इत्युपदिशति । अद्य मानवता पाश्चात्यसंस्कृतेः संसर्गेण लुप्तप्रायेव प्रतीयते। अहर्निशं मानवाः स्वार्थसाधनसंलग्नाः मानवतां व्यस्मरन् । एवं विधेः आधुनिककाले वेदेषु प्रतिपादितानां वैदिकयज्ञानाम् आवश्यकता अतीव वर्तते।

यज्ञस्य महत् तात्पर्यं भवति त्यागः। स्वस्य प्रियपदार्थादिकम् अग्नेः तथा वायोः माध्यमेन सकलसंसारस्य कल्याणाय यज्ञद्वारा वितीर्यते। वायोः शोधनेन सर्वेषाम् अरोग्यवर्धनस्य अवसरः प्राप्यते। हूताः वायवः प्राणिमात्रस्य स्वास्थ्यवर्धनं कुर्वन्ति, रोगनिवारणे सहायकाः भवन्ति। यज्ञकाले उच्चारितैः वेदमन्त्रैः जनानाम् अन्तःकरणस्य सात्त्विकी शुद्धता जायते। एवं प्रकारेण स्वल्पप्रयासेन जनानां महान् उपकारः साध्यते।

**वेदोऽखिलो धर्ममूलम्**[2]इत्यत्र को नाम धर्म इति चेदुच्यते मीमांसकाः **वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म**[3] इति धर्मलक्षणं कृत्वा **यागादिरेव धर्मः**[4] इत्यनेन वेदप्रतिपादितान् यज्ञान्नेव धर्मत्वेन प्रत्यपादयन्। **यज्ञेन यज्ञमयजंत देवा स्तानि धर्मानि प्रथमान्यासन्**[5] इति वचनेन यज्ञीयधर्मस्यैव प्राधान्यं द्रष्टुं शक्नुमः। सोऽयं यज्ञः श्रौतस्मार्तभेदाद्विविधः। तत्र श्रुतिप्रतिपादिताः श्रौतयज्ञाः, स्मृतिप्रतिपादिताश्च स्मार्तयज्ञाः। तथैव यज्ञ-यागादयः विशेषतया पञ्च प्रकाराः दृश्यन्ते यथा - होमः, इष्टिः, पशुः, सोमः, सत्रः चेति। वैदिकयागः प्रकृतिविकृतिभेदेन द्विधः। प्रकृतियागमाश्रित्यैव विकृतियागाः अनुष्ठीयन्ते।

**वैदिकयज्ञानां महत्त्वम्**

वैदिककालादारभ्य भारतीयसंस्कृतौ यज्ञ-यागादीनाम् अनुष्ठानं शुभकार्यस्य संसूचकत्वेन भवतीति वक्तुं नास्ति लेशमात्रसंशयः। यक्षो भवति शुद्धीकरणस्य क्रियाविशेषः। क्रियायामस्यां अग्निः पवित्रतायाः प्रतिकरूपेण स्थीयते। आयुर्वेदस्यानुसारं यज्ञ-यागादिषु अग्नेः उत्पन्नेन धूमेन वायुशोधनं भवतीति। यज्ञ-यागादीनां प्रधानोद्देश्यं भवति धार्मिकप्रवृत्त्यर्थं सत्प्रयोजनार्थं च जनानां संहतिसाधनम्।

शृतिर्वानित्यम्, भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिद्ध्यति, वेद एव द्विजातीनां निःश्रोयसकरः परः, वेदाद्धर्मो हि निर्भभौ, धर्मः जिज्ञासमानानां प्रमाणं परमशृतिः इत्यादि प्रमाणानि विमर्शनात्मदृष्टौ अवलोकिते सति अपौरुषेय-अनादि-स्वतःप्रमाण-नित्य-निर्दुष्टयुक्तानां वेदानाम् आवश्यकताम् अवगन्तुं शक्नुवन्ति। धर्मः वेदादेव आविर्भूतः इति च वक्तुं शक्यते । **धर्मो हि जगत प्रतिष्ठा, सर्वं धर्मे प्रतिष्ठति, धर्मो**

---

2 मनुस्मृति-2/6

3 अर्थसंग्रहे (धर्मलक्षणप्रसंगः)

4 अर्थसंग्रहे (धर्मलक्षणप्रसंगः)

5 शुक्लयजुर्वेद संहिता-31/16

**रक्षति रक्षितः** इत्यादि प्रमाणैः ज्ञायते यत् धर्म एव सकललोकस्य आधारभूतः इति। **यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्** इति गीतोक्त्याधारेण यज्ञ-दान-तप-दैवपूजादि सत्कार्याणि जीवने अतिमुख्यानि ।

वैदिकधर्माचारणे अतिमुख्यं कार्यं नित्यनैमित्तिककार्यानि च भवन्ति यज्ञयागादयः। पूर्वं अग्निहोत्र-होम-हवन-सवन-यज्ञादीनां निर्वहनं नित्यनैमिककार्यक्रमः आसीत्। यज्ञानामाधारेण ज्ञान-भक्ति-दैवप्रसादस्वीकरणद्वारा मोक्षफलप्राप्त्यर्थमेव एतान् कार्यक्रमान् आचरन्ति स्म। एतेषु यज्ञयागादिषु भस्मीभूतभिः सेन्द्रियवस्तुभिः उत्पाद्यमानक्रिमिनाशकपदार्थाः रोगकारकाणूनां नाशनं कृत्वा पर्यावरणं प्रदूषणरहितं कुर्वन्ति स्म। पर्यावरणेऽस्मिन् जनाः अपि अरोग्यवन्ताः दृढकायभूताः च भवितुम् अवकाशोऽस्ति। येषु यज्ञयागादिषु केवलं सेन्द्रियपदार्थानामेव उपयोगः भवति स्म। परन्तु यागादिषु उपयुज्यमानवस्तूनां वैज्ञानिकतां याज्ञिकाः न लक्षितवन्तः । अतः एव ते वैज्ञानिकतायाः विषये प्रचारः न कृतवन्तः।

यज्ञयागादिषु घृत-क्षीर-पिष्टक-ओदन-गुढ-फल-नारिकेलादीनि विविधानि वस्तूनि उपयुज्यमानानि भवन्ति स्म। अधुनिकतायाः अभिवृद्धौ सति एतेषामुपयोगः व्यर्थः इति, यज्ञयागादयः पाम्परिकमूढविश्वासाः इति च केचन निरस्ताः । परन्तु एताः भावनाः असमीचीनाः इति यागादीनां प्रयोगः अतीवोपकाराय इति कतिचन प्रयोगैः विज्ञातः। रसायनपदार्थेभ्यः उत्पद्यमानप्रदूषणस्य निवारणं सेन्द्रियपदार्थानुपयुज्य क्रियमानयागाः एव इति।

**वर्तमानकाले वैदिकयज्ञयागादीनाम् आवश्यकता महत्त्वञ्च –**

यज्ञयागादिषु भस्मीभूतपदार्थाः **काष्ठानि** अश्वत्थ-पलाश-मत्ति-श्रीगन्ध-देवदारु-आम्र-पनस-तिन्त्रिणि-अर्जुन(साल)-शमी-बदरि-अर्कादयः। अन्यानि गोमलं, घृतं, नवनीतं, क्षीरादयः, नवधान्यानि, नारिकेलं, पिष्टकं, अन्नं, गृढः, सुगन्धद्रव्यानि इत्यादीनि सर्वाण्यपि सेन्द्रियपदार्थाः एव भवन्ति। एतादृशानां पदार्थानां यज्ञयागादिषु दहनक्रियाकरणेन विविधरसायनिकप्रतिक्रियाः भूत्वा अनेकक्रिमिनाशकधूमादयः उत्पद्यमानाः भवन्ति। यासु प्रतिक्रियासु **फार्माल् डिहैड् (HCHO), एनिटाल् डिहैड् ($CH_3CHO$), असिटिक् आसिड् ($CH_3COOH$), आलाल् डिहैड् ($CH_3OH$), असिटोस् ($CH_3COCH_3$), फिनोल् ($C_3H_6OH$)** इत्यादयः अनेके हैड्रोकार्बन्स् उत्पन्नाः भवन्तीति। एतानि सर्वाण्यपि क्रिमिनाशकतत्त्वयुक्तानि एव। एतान् विषयान् केचन वैज्ञानिकाः अपि अङ्गीकृताः सन्ति। यज्ञयागादिषु उत्पद्यमानरसायनपदार्थाः केवलं क्रिमि-कीटकानामेव नाशनम्, अपि तु दीर्घकालिकविविधरोगान् अपि दूरीकुर्वन्ति। यज्ञकुण्डात् आगम्यमानगन्ध-धूमादिभिः सूक्ष्माणवः मानवस्य देहं प्राप्य नेत्र-शिर-उदर-त्वगादिरोगान् निवारयितुं साहाय्यं कुर्वन्ति।

अधुनापि आयुर्वेदवैद्यविधिषु भस्मचिकित्साविधिरपि दृश्यते । तत्र भस्मं यज्ञयागादिद्वारा संगृह्णन्ति। अस्तिगतरोगाय **ट्यूबर् क्यूलोसिस्**, नेत्ररोगाय **अमृतकाण्डम्** उपयुज्य होमकरणेन लाभः सञ्जायते। नागकेसरि-लवङ्ग-एला-मरीच-अश्वगन्ध-देवदारु इत्यादीनां मन्त्रपूर्वकं यागं कृत्वा तत् भस्मं प्रतिदिनं सेवनेन श्वासकोश-उदर-पाण्डु-अजिर्णादिरोगानां निवारणं कर्तुं शक्यते।

तथैव पर्यावरणपरिरक्षणयुक्ताः विविधरसायनादि उत्पादनय एते यज्ञयगादयः उपयुक्ताः भवन्ति। पूर्वकाले यज्ञयागादयः कतिपय दिनानि यावत् प्रचलन्ति स्म। यज्ञसमाप्तिं यावत् याज्ञिकाः आदिनं यावत् उपविश्य मन्त्रोच्चारणम्, तथैवोपविष्टासनाद् भ्रमणं च न भवति । तेन देहधारुढ्यमपि संवर्धते स्म। पदार्थानां व्यर्थीकरणाय एव यज्ञयागादीनां निर्वहनमिति न मन्तव्यम्। अत एव कालभेदं विना यागादीनां निर्वहणं पर्यावरण-स्वास्थ्य-धर्मादीनां संरक्षणाय अवश्यं भवेदिति ।

**उपयुक्तग्रन्थसूची**


1. याज्ञवल्क्यस्मृतिः – विज्ञानेश्वरः – चौखाम्भा संस्कृत प्रकाशनम् – वाराणसी.
2. वैदिकवाङ्मयविवेचनम् – डॉ.कृष्णलालः – जे.पि.पब्लिकेशन् हउस् – दिल्ली.
3. भारतीय संस्कृति – डॉ.प्रीति प्रभा गोयल, राजस्थानी ग्रन्थगार, जोधपूर.
4. आपस्तम्बश्रौतसूत्रम्  कपिलदेव शुक्ल, वैशाली प्रकाशन, बक्शीपुर, गोरखपुर
5. अष्टाविंशत्युपनिषद् सङ्ग्रहः  वैदिक सङ्ग्रहः, चौखम्बा ओरियाण्टालिया, बंग्लो रोड, 9 यू. बी. जवाहर नगर, दिल्ली-07
6. अर्थसङ्ग्रहः, लौगाक्षिभास्कर, सम्पा. प्रो. वाचस्पति उपाध्याय, चौखम्बा पब्लिशर्स गोकुल भवन के. 37/109 गोपाल मन्दिर लेन, वाराणसी
7. वैदिकं रसायनविज्ञानम् – डॉ.सुन्दर नारायण झा – श्री.वे.वैदिकविश्वविद्यालयः, तिरुपतिः.